अष्टमः पाठः

Lesson – 8

8

# परिवर्तितः बालकः

कश्चन बालकः अस्ति । सः अलसः अस्ति । सः प्रतिदिनं विद्यालयं न गच्छति । एकदा सः उद्यानं गच्छति ।

तत्र एकं काकं पश्यति । सः काकं क्रीडार्थम् आह्वयति । काकः वदति मम समयः नास्ति इति।

अनन्तरं सः एकं शुकं पश्यति । बालकः शुकं क्रीडार्थम् आह्वयति । शुकः, अपि मम समयः नास्ति इति वदति ।

अनन्तरम् एकां पिपीलिकां पश्यति । क्रीडार्थम् आह्वयति च । तदा पिपीलिका अपि समयः नास्ति इति वदति ।

बालकः सर्वं श्रुणोति । तस्य लज्जा भवति । सर्वे स्वे – स्वे कार्ये निरताः इति जानाति । अतः सः आलस्यं त्यजति। विद्यालयं समयेन गच्छति । सम्यक् पठति च ॥

